# 2 संस्कृतभाषाया: महत्त्वम्

धन्योऽयम् भारतदेश: यत्र समुल्लसति जनमानसपावनी, भव्यभावोद्भाविनी, शब्द-सन्दोह-प्रसविनी सुरभारती। विद्यमानेषु निखिलेष्वपि वाङ्मयेषु अस्या: वाङ्मयम् सर्वश्रेष्ठं सुसम्पन्नं च वर्तते। इयमेव भाषा संस्कृतनाम्नापि लोके प्रथिता अस्ति। अस्माकं रामायण-महाभारताद्यैतिहासिकग्रन्था:, चत्वारोवेदा:, सर्वा उपनिषद:, अष्टादशपुराणानि, अन्यानि च महाकाव्य-नाट्यादीनि अस्यामेव भाषायां लिखितानि सन्ति। इयमेव भाषा सर्वासामार्यभाषाणां जननीति मन्यते भाषातत्त्वविद्भि:। संस्कृतस्य गौरवं बहुविधज्ञानाश्रयत्वं व्यापकत्वं च न कस्यापि दृष्टेरविषय:। संस्कृतस्य गौरवमेव दृष्टिपथमानीय सम्यगुक्तमाचार्यप्रवरेण दण्डिना–

**संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभि:।**

संस्कृतस्य साहित्यं सरसं, व्याकरणञ्च सुनिश्चितम्। तस्य गद्ये पद्ये च लालित्यं, भावबोधसामर्थ्यम्, अद्वितीयं श्रुतिमाधुर्यञ्च वर्तते। किं बहुना चरित्रनिर्माणार्थं यादृशीं सत्प्रेरणा संस्कृतवाङ्मयं ददाति न तादृशीम् किञ्चिदन्यत्। मूलभूतानां मानवीयगुणानां यादृशी विवेचना संस्कृतसाहित्ये वर्तते नान्यत्र तादृशी। दया, दानं, शौचम्, औदार्यम्, अनसूया, क्षमा, अन्ये चानेके गुणा: अस्य साहित्यस्य अनुशीलनेन सञ्जायन्ते।

संस्कृतसाहित्यस्य आदिकवि: वाल्मीकि:, महर्षिव्यास:, कविकुलगुरु: कालिदास: अन्ये च भास-भारवि भवभूत्यादयो महाकवय: स्वकीयै: ग्रन्थरत्नै: अद्यापि पाठकानां हृदि विराजन्ते। इयं भाषा अस्माभि: मातृसमं सम्माननीया वन्दनीया च, यतो भारतमातु: स्वातन्त्र्यं, गौरवम्, अखण्डत्वं सांस्कृतिकमेकत्वञ्च संस्कृतेनैव सुरक्षितुं शक्यन्ते। इयं संस्कृतभाषा सर्वासु भाषासु प्राचीनतमा श्रेष्ठा चास्ति। तत: सुष्ठूक्तम् 'भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती' इति।

## अभ्यास प्रश्न

### लघु उत्तरीय प्रश्न

१. संस्कृतसाहित्यस्य आदिकवि: क: आसीत्? **[2018 AH, 19 CN, 20 ZC, ZD]**

२. संस्कृतस्य के-के प्रमुखा: कवय: आसन्?

अथवा संस्कृतभाषाया: मुख्या: कवय: के सन्ति? **[2019 CO]**

३. का भाषा अस्माभि: मातृसमं माननीया?

४. भाषासु प्राचीनतमा श्रेष्ठा च भाषा का अस्ति? **[2020 ZG]**

५. का भाषा सर्वासाम् आर्यभाषाणां जननी मन्यते?

६. संस्कृतसाहित्यस्य अनुशीलेन के गुणा: सञ्जायन्ते?

७. कस्य साहित्यम् सरसं व्याकरणं च सुनिश्चितम्? **[2019 AL]**

८. संस्कृत भाषायां कति पुराणानि लिखितानि सन्ति? **[2020 ZD]**

९. संस्कृत भाषा प्राचीना अथवा नवीनास्ति? कथय!

१०. संस्कृतसाहित्यस्य का विशेषता?

११. संस्कृतस्य गौरवं दृष्ट्वा दण्डिना किम् उक्तम् ?

१२. कस्य वाङ्मयं सर्वश्रेष्ठं वर्तते?

१३. का भाषा देवभाषा इति नाम्ना ज्ञाता? **[2017 MK]**

१४. संस्कृतस्य साहित्य: व्याकरणञ्च कीदृशं वर्तते? **[2020 ZB]**

## अनुवादात्मक प्रश्न

**१. अधोलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) धन्योऽयम् ............................................ लिखितानि सन्ति। **[2017 ML, 19 CP]**

अथवा विद्यमानेषु निखिलेष्वपि.......................... कस्यापि दृष्टेरविषय:।

अथवा धन्योऽयम् .................................................. दृष्टेरविषय:। **[2017 MH]**

अथवा धन्योऽयम् .............................................. भाषातत्त्वविद्भि:।

(ख) संस्कृतस्य ................................................... सञ्जायन्ते। **[सा०2020 ZH, ZI, ZJ, ZK, ZL, ZM]**

(ग) संस्कृतसाहित्यस्य.................................... गीर्वाणभारती इति। **[2016 SJ, 19 CM]**

अथवा संस्कृतसाहित्यस्य आदिकवि: ....................... सुरक्षितुं शक्यन्ते। **[2016 SK, SN, 18 AH,20ZD]**

अथवा संस्कृतसाहित्यस्य........................................... श्रेष्ठा चास्ति।

(घ) इयं भाषा अस्माभि: ............................ 'गीर्वाण भारती' इति। **[2020 ZF]**

**२. अधोलिखित सूक्तिपरक पंक्तियों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभि:।

(ख) भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।

**३. अधोलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) संस्कृत भाषा प्राचीनतम भाषा है।

(ख) यह समस्त भारतीय भाषाओं की जननी है।

(ग) ऋषियों ने इसे देववाणी कहा है।

## व्याकरणात्मक प्रश्न

**१. अधोलिखित शब्दों में विभक्ति एवं वचन बताइए–**

गद्ये, संस्कृतस्य, कवय:, विद्यमानेषु।

**२. अधोलिखित शब्दों में सन्धि-विच्छेद कीजिए–**

इयमेव, नान्यत्र, कस्यापि।

## शब्दार्थ

**जनमानसपावनी** = जनमानस को पवित्र करनेवाली। **भव्यभावोद्भाविनी** = (भव्य-भाव**र**+ उद्भाविनी) सुन्दर भावों को उत्पन्न करनेवाली। **शब्द-सन्दोह-प्रसविनी** = शब्दों के समूह को जन्म देनेवाली। **वाङ्मयेषु** = साहित्यों में। **बहुविधज्ञानाश्रयत्वम्** = (बहुविध-ज्ञान**र**+ आश्रयत्वम्) अनेक प्रकार के ज्ञान का आश्रय होना। **अन्वाख्याता** = कहा है। **प्रथिता** = प्रसिद्ध। **सन्दोह** = समूह। **दैवीवाक्** = देववाणी। **यादृशी** = जैसी। **शौचं** = पवित्रता। **औदार्यम्** = उदारता। **अनसूया** = निन्दा न करना, **सांस्कृतिकमेकत्वञ्च** = (सांस्कृतिकम् + एकत्वम् +**र**च) सांस्कृतिक एकता। **सुरक्षितुं शक्यन्ते** = सुरक्षित हो सकती है। **सुष्ठूक्तम्** = (सुष्ठु + उक्तम्) ठीक कहा गया है। **गीर्वाणभारती** = देववाणी (संस्कृत)।